**CLASS : 10th (Secondary)** **Code No. 2143**

**Series : Sec/Annual Exam.-2025**

*रोल नं०* | | | | | | | | | | |

# पूर्व मध्यमा सह माध्यमिक परीक्षा संस्कृत साहित्य (परम्परागत संस्कृत विद्यापीठ)

**Sub. Code : 1003/SSA**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **5** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशाः*** -(क) ***सर्वे प्रश्नाः समाधेयाः।***

(ख) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ग) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्य मेव लेखनीया।

(घ) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

## खण्डः 'क'

### [ वस्तुनिष्ठात्मक प्रश्नाः ]

**1.** अधोलिखितानां प्रश्नानामुत्तरं विकल्पेषु ***शुद्धविकल्पं*** चित्वा लिखत — $1 \times 10 = 10$

(i) हितोपदेशः केन विरचितः ?

(क) बाणभट्टेन (ख) भासेन

(ग) श्रीनारायणेन (घ) दण्डिना

(ii) कस्य मूर्ध्नि जाहनवीफेनलेखेव शशिनः कला ?

(क) धूर्जटेः (ख) रामस्य

(ग) ब्रह्मणः (घ) अर्जुनस्य

(iii) विद्या किं ददाति ?

(क) विनयम् (ख) आचारम्

(ग) यशः (घ) शौर्यम्

(iv) कः अजरामरबत् विद्यां अर्थम् च चिन्त्येत् ?

(क) मूर्खः (ख) धनिकः

(ग) प्राज्ञः (घ) स्त्री

(v) कस्यास्तटे पाटलिपुत्र नामधेयं नगरम् ?

(क) भागीरथ्याः (ख) सरस्वत्याः

(ग) नर्मदायाः (घ) यमुनायाः

(vi) परिवर्तिनि कस्मिन् मृतः को न जायते ?

(क) व्यापारे (ख) संसारे

(ग) द्यूते (घ) व्यवहारे

(vii) महतामपि अवश्यं भाविंनः के भवन्ति ?

(क) भावाः (ख) धान्यानि

(ग) धनानि (घ) मित्राणि

(viii) कः पिता शत्रुः ?

(क) ऋणकर्ता (ख) बुद्धिप्रदाता

(ग) धनदाता (घ) जीवप्रदाता

(ix) गर्भस्थस्यैव कस्य पञ्चैतानि सृज्यन्ते ?

(क) देहिनः (ख) वृद्धस्य

(ग) युवकस्य (घ) जरायाः

(x) केन हीनाः पशुभिः समाना ?

(क) अधर्मेण (ख) धनेन

(ग) धर्मेण (घ) यौवनेन

**2.** अधोलिखितानां प्रश्नानां उत्तराणि ***एकपदेन*** ददतु — 1 × 30 = 30

(i) केन हितोपदेशः रचितः ?

(ii) कथाच्छलेन केषां नीतिः कथ्यते ?

(iii) कीदृशः पुत्रो वरम् ?

(iv) जीवलोकस्य कति सुखानि ?

(v) कीदृशी माता शत्रुः ?

(vi) एकेन चक्रेण कस्य गतिर्न भवेत् ?

(vii) उद्योगिनं पुरुषसिंह का उपैति ?

(viii) दैवेन देयं के वदन्ति ?

(ix) सुप्तस्य सिंहस्य मुखे के न प्रविशन्ति ?

(x) सभायां वस्त्रवेष्टितः कः शोभते ?

(xi) कोचनसंसर्गाद् कः मारकतीं द्युत्तिं धत्ते ?

(xii) गुणज्ञेषु के गुणाः भवन्ति ?

(xiii) कीटः कस्य संगात् सतां शिरः आरोहति ?

(xiv) काव्यशास्त्रविनोदेनधीमतां को गच्छति ?

(xv) गोदावरीतीरे कस्तरुरस्ति ?

(xvi) व्याधेन तण्डुलकणान् विकीर्य किं विस्तीर्णम् ?

(xvii) कपोतराजस्य किन्नाम ?

(xviii) कस्य अष्टविधः मार्गः स्मृतः ?

(xix) धर्मस्य कतिविधः मार्गः स्मृतः ?

(xx) गतानुगतिकः कः ?

(xxi) दरिद्रे दीयते दानं किम्भवति ?

(xxii) मातृवत्परदारेषु कः पश्यति ?

(xxiii) व्याधितस्यौषधं किम् ?

(xxiv) गवां पयः प्रकृत्या किं भवति ?

(xxv) कां विना ज्ञानं भारः ?

(xxvi) मूर्ध्नि को वर्तते ?

(xxvii) सर्वस्य के परीक्ष्यन्ते ?

(xxviii) लोभः कस्य कारणम् ?

(xxix) केषां धियोऽपि मलिना भवन्ति ?

(xxx) कति दोषाः पुरुषेण हातव्याः ?

**खण्डः 'ख'**

**[ अतिलघूत्तरीयाः प्रश्नाः ]**

**3.** निम्नांकितश्लोकेषु रिक्तस्थानानि पूरयत — $2 \times 7 = 14$

(क) यथा ह्येकेन ................ नसिध्यति।।

(ख) नदीनां शस्त्रपाणीनां ............. च।।

(ग) अज्ञातकुलशीलस्य .............. जरद्गवः।।

(घ) कुतस्त्वा ............. मर्जुन।।

(ङ) नासतो विद्यते ........... तत्वदर्शिभिः।।

(च) योगस्थः ............. उच्यते।।

(छ) स्थितप्रज्ञस्य .............. किम्।।

**खण्डः 'ग'**

**[ लघूत्तरीयाः प्रश्नाः ]**

**4.** निम्नलिखितश्लोकेषु कयोश्चिद् ***द्वयोः*** व्याख्या सप्रसंग विधेया — $3 \times 2 = 6$

(क) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।

(ख) प्रसादे सर्वदुःखानां हानिरस्योपजायते।

प्रसन्नचेतसो हयाशु बुद्धिः पर्यवतिष्ठते।।

(ग) उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्।
मरणव्याधिशोकानां किमद्य निपतिष्यति।

(घ) षड् दोषाः पुरुषेणेह हातव्याः भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता।।

**5.** निम्नांकित श्लोकान् पठित्वा श्लोकाधारित प्रश्नानां उत्तरं ददतु — $5 \times 4 = 20$

(i) जातस्य हि ध्रुवोमृत्युर्ध्रुवं जन्ममृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।

(क) कस्य हि ध्रुवोमृत्युः ?

(ख) मृतस्य किं ध्रुवम् ?

(ग) हि शब्दस्य कोऽर्थः ?

(घ) त्वं शब्दस्य प्रयोगः कस्यकृते।

(ङ) अत्र कश्छन्दः।

(ii) नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयतिमारुतः।।

(क) एनं कानि न छिन्दन्ति ?

(ख) पावकः कं न दहति ?

(ग) एनं को न दहति ?

(घ) आपः कं न क्लेदयन्ति ?

(ङ) एनं को न शोषयति ?

(iii) ऋणकर्तापिता शत्रुर्माता च व्यभिचारिणी।

भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः।।

(क) कः पिता शत्रुः ?

(ख) ऋणकर्ता पिता कः ?

(ग) कीदृशी भार्या शत्रुः ?

(घ) कः पुत्रः शत्रुः ?

(ङ) अत्र कश्छन्दो विद्यते ?

(iv) स हि गगनविहारी कल्मषध्वंसकारी,

दशशतकरधारी ज्योतिषां मध्यचारी।।

विधुरपि विधियोगाद् ग्रस्यते राहुणाऽसौ,

लिखितमपि ललाटे प्रोज्झितुं कः समर्थः।।

(क) विधुशब्दस्य कोऽर्थः ?

(ख) को गगनविहारी ?

(ग) केषां मध्यचारी विधुः ?

(घ) विधियोगाद् केन ग्रस्यते ?

(ङ) विधियोगाद् कः राहुणा ग्रस्यते ?